RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.:
4-5, 19-20 of Every Month

॥ ओ३म् ॥

कस्यात्यन्तं सुखमुपनतं
दुःखमेकान्ततो वा
नीचौर्गच्छत्युपरिच दशा
चक्रनेमिक्रमेण॥
महाकवि कालिदास।

परिवर्तिनि संसारे मृतः
को वा न जायते।
स जातो येन जातेन याति
वंशस्समुन्नतिम्॥ नीतिशतकम्

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३१११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

जलं तदुद्भवैश्छन्नं हित्वाज्ञो
जलकाम्यया। मृगतृष्णामुपाधावेद्
यथान्यत्रार्थदृक् स्वतः ॥
( श्रीमद्भागवत - 7/13/28 )

चन्द्रां प्रभासां यशसा ज्वलन्तीं
श्रियं लोके देव-जुष्टामुदाराम्।
तां पद्म-नेमिं शरणमहं प्रपद्ये
अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥
( ऋग्वेद )

卐 वर्षम्-१४ 卐 अंकः-०९ ( ३२१ ) नवदेहली 卐 १ नवम्बरमासः २०२४तः १५ नवम्बरमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-१२

## संस्कृतस्य संरक्षणेनैव भारतस्य महान् पारम्परिकः सम्मानः सुरक्षितः- मुख्यमन्त्री-योगी-आदित्यनाथः

संस्कृतम् अवगंतव्यं चेत् स्वस्तिवाचनस्य मंगलाचरणस्य च स्वरः स्वजीवने समाहृत्य तत्समं तारतम्यं संस्थापनीयम्। संस्कृत देववाण्या सार्धमेव वैज्ञानिक भाषा अपि अस्तीत्येषः विचारः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय परिसरे आयोजिते उत्तरप्रदेशस्य यशस्वी मुख्यमंत्री एवं कार्यक्रमस्य मुख्यातिथिश्री योगी आदित्य नाथः व्यक्तीकृतवान् । मुख्यमंत्री श्री योगीआदित्यनाथः प्रदेशस्य ६९१९५ विश्वविद्यालयेन संबद्ध विद्यालयानां संस्कृत विद्यार्थिभ्यो ५८६ लक्षरूप्यकाणां छात्रवृत्ते संवितरणं कुर्वन्नुक्तवान् यच् 'छात्रवृत्ति



वितरण समारोहः' भारतीय संस्कृतेः आत्मनेऽत्यन्तं महत्वपूर्णम्।

समारोहस्य विशिष्टातिथिः प्रदेशस्य उच्च शिक्षामंत्री श्री योगेन्द्र उपाध्यायः कथितवान् यत् काशी देवनगरी संस्कृत देवभाषा च । तेन भारतीय संस्कृतेः केन्द्रं काशीं बोधयता कथितं यद् पूर्णविश्वस्य लोकाः सरस्वत्यां निमज्जितुं काशीम् आयान्ति। समारोहस्य अध्यक्षतां एवं आगंतुक अतिथीनां च स्वागतम्/अभिनंदनं कुर्वन् विश्वविद्यालयस्य कुलपतिः प्रो० बिहारीलाल शर्मा कथितवान् यत् शेषभागःद्वितीयेपुटे

## राष्ट्रसमन्वयसाधकं वर्त्तते अद्वैतवेदान्तदर्शनं – प्रो.मुरलीमनोहरपाठकः

डॉ.दिनेश चौबे, उज्जयिनी

पद्मश्रीः वि. वेंकटाचलम् स्मृत्युपक्रमस्य अन्तर्गतं १८ अक्टूबर २०२४ तमे दिनाङ्के उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये व्याख्यानशृङ्खलायाः प्रथमे व्याख्याने तत्र मुख्यवक्तृरूपेण प्रो. मुरलीमनोहरपाठकमहोदयः माननीयः कुलपतिः श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः




नवदेहली "राष्ट्रसमन्वयकसाधकं अद्वैतदर्शनम्" इति विषये उक्तवान् यत् भारतीयचिन्तनपरम्परायां सर्वसम्प्रदायानां मध्ये समन्वयस्य स्थापनायाम् अद्वैतदर्शनस्य महत्त्वपूर्णा भूमिका अस्ति। वेदान्तदर्शनस्य नानाशाखासु अद्वैतवेदान्तदर्शनं मुख्यम् । 'अहं ब्रह्मास्मि' इयमनुभूति ब्रह्मस्य साक्षात्कारं कारयति तथा च अनेन व्यक्तेः कल्याणस्य मार्गः प्रशस्तः भवति। कार्यक्रमस्य अध्यक्षः माननीयः कुलगुरुः प्रो.विजयकुमारसीजीमहोदयः उक्तवान् यत् पद्मश्रीः वी वेङ्कटाचलम् संस्कृतविद्वान् महान् दार्शनिकः च आसीत् । तस्य व्यक्तित्वेन सर्वे परीचिताः भवेयुः तदर्थं इयं व्याख्यानगोष्ठी आयोजिता आसीत्। राष्ट्रस्य प्रगतेः स्थापनायां च अद्वैतवेदान्तदर्शनस्य विशेषस्थानं वर्तते। आदिशङ्कराचार्यादिभिः ऋषिभिः भारते अद्वैतदर्शनं स्थापितम् । येन कारणेन राष्ट्रस्य आध्यात्मिकी प्रगतिः अभवत्। अस्मिन् अवसरे पद्मश्रीः वी वेंकटाचलस्मृतिप्रतियोगितायां विजितछात्रान् पुरष्कारेण सम्मानितः। प्रास्ताविकम् अतिथिपरिचयः च दर्शनविभागस्य अध्यक्षेण डॉ. अखिलेशकुमारद्विवेदीमहोदयेन प्रस्तुतः। कार्यक्रमे कुलसचिवः प्रो.दिलीपसोनीमहोदयः डॉ.शुभामुंगी, प्रो.केदारनारायणजोशी, डॉ.गिरीशगोवर्धनचतुर्वेदी, डॉ. तुलसीदासपरोहा, डॉ. नलिनीरेवडीकर, डॉ.पूजा उपाध्याया अन्ये शिक्षकाः, छात्राः, शोधच्छात्राः , सामाजिकाश्च उपस्थिताः आसन् द्यकार्यक्रमस्य संचालनं डॉ. शैवालाचार्येण आभारज्ञापनं डॉ. संकल्पमिश्रेण च कृतम्। अस्मिन् अवसरे योगविभागस्य छात्रैः योगनृत्यस्य प्रस्तुतिः प्रस्तुता।

## संस्कृतस्य बहु-आयामी उत्कर्षः इत्यनया भावनया सह अखिलभारतीयप्राच्यविद्यासम्मेलनं ( AIOC ) संपन्नम्

उडुपी (अजयकुमारमिश्रा)

भारतस्य सांस्कृतिक त आध्यात्मिक नगर्याम् उडुप्यां त्रिदिवसीयं एकपञ्चाशम् अखिल भारतीय प्राच्यविद्यासम्मेलनम् आयोजितम्। सम्मेलनस्य मुख्यातिथिः योगगुरु स्वामीरामदेवः कथितवान् यद् उडुपी स्वीयेभ्यः आध्यात्मिक - दार्शनिक योगदानेभ्यः विश्वस्मिन् चर्चिता विद्यते । येषु माध्वाचार्यस्य द्वैतवादी दर्शनम् अत्यन्तम् अधिकं महत्त्वपूर्णम्। गीता दर्शनमपि अत्यन्तं तात्त्विक रुपेण स्थापितम्। तेन संस्कृताध्ययनेन सम्बद्धेषु जगतः समस्त क्षेत्रेषु नूतनेतिहासस्य प्रतिमानं संस्थापयिष्यते। तत्र विशेषेण




छात्राणाम् आह्वाहनं विहितं यन्नूतनप्रतिमानाय भूमिः, पुरुषार्थः, पूंजी इत्येषां निवेशः आवश्यकः।

सारस्वतातिथिरुपेण पतंजलि विश्वविद्यालय-हरिद्वारस्य कुलपतिः आचार्यः बालकृष्णः भारतीयेतिहासस्य प्राचीनता-लिपि-वर्णानाम् आधारेण महत्त्वपूर्णं व्याख्यानं दत्तवान् । एषः नव जागरण कालः कथयिष्यते।

भारतीय भाषा परिषद्, भारत सर्वकार पद्मश्री चमू कृष्ण शास्त्री सम्मानित अतिथि रुपेण उक्तवान् यत् भारतीय समावेशी तात्त्विक ज्ञान परम्परा प्राकृतिक पारिस्थितिकी इत्यनयोः गुणवत्तां केन्द्रीकृत्य विकसित भारतस्य निर्माणं क्रियेत। अतः एतदपि आवश्यकं यद् ओरिंयटल शब्दः परिवर्त्येत। सममेव भारतीय चिन्तनस्य दृष्ट्या विचारणीयम्। भारतस्य शास्त्रीय भाषा-संस्कृतेन सह पाली प्राकृत इत्यादिकमपि महत्त्वपूर्णं मूलं स्रोतो विद्यते। केन्द्रीय संस्कृत विश्वविद्यालय , दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवास वरखेडी विशेषातिथिरुपेण कथितवान् यद् विश्वस्मिन् अद्य भारतं प्रत्यय कालः। येन आगामिसमये संस्कृतं जगतः अस्मितायाः परिचयः भविष्यति। अतः भारतम् एकस्य नूतनवैश्विक युगस्य श्री गणेश कर्तृ विद्यते। येन 'इंडिया' स्थाने 'भारतस्य' स्थानं भविष्यति । शेषभागःद्वितीयेपुटे

## प्रभुश्रीरामः सम्पूर्णविश्वे पूज्यः एवञ्च लोकप्रियः – पद्मश्रीः प्रो. अभिराजराजेन्द्रमिश्रः

डॉ. दिनेश चौबे, उज्जयिनी

मध्यप्रदेशसर्वकारस्य संस्कृतिविभागेन,उज्जयिनीस्थ त्रिवेणीकलापुरातत्त्वसंग्रहालयेन च संयुक्तरूपेण महर्षिपाणिनिसंस्कृत वैदिकविश्वविद्यालये श्रीरामलीलाचरित्राधारितं चतुर्दिवसीयं विशिष्टव्याख्यानकार्यक्रमस्य आयोजनं कृतम् आसीत्। व्याख्यानकार्यक्रमस्य द्वितीयदिवसे २० अक्टोबर् तमे दिनाङ्के वाराणसीस्थ सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः पद्मश्रीः प्रो अभिराजराजेन्द्रमिश्रमहोदयः मुख्यवक्तृरुपेण रामकथायाः विविधता एवञ्च व्यापकता इति विषये व्याख्यानं प्रददन् उक्तवान् यत् रामकथा न केवलं भारते अपितु नेपाले, श्रीलङ्कादेशे इन्डोनेशिया, थाईलैण्ड, कम्बोडिया इत्यादिषु देशेषु महता आदरेण आनन्देन च भवति। मर्यादापुरुषोत्तमस्य भगवतः श्रीरामस्य सन्निधौ ये भक्ताः आगच्छन्ति ते संसारसागरात् तरन्ति। श्रीरामस्य स्वरूपं अवगत्य वयं स्वस्य व्यक्तिगत-सामाजिक-राजनैतिकादिनां-समस्यानां निवारणं कर्तुं शक्नुमः। श्रीरामः पुत्रः, पतिः, मित्रम्, पिता, शिष्यः एवं च आदर्शप्रजारक्षकरूपे स्वकर्तव्यान् पूर्णसमर्पणभावेन निर्वहनं कृतवान् । प्रो. मिश्रेण श्रीरामजीवनचरित्रस्य ऐतिहासिकं प्रामाणिकञ्च उद्धहराणि प्रस्तुतानि। कार्यक्रमस्य अध्यक्षः महर्षिसान्दिपनिराष्ट्रीयवेदविद्या प्रतिष्ठानस्य सचिवः प्रो. विरुपाक्षजड्डीपालमहोदयः उक्तवान् यत् श्रीरामस्य चरित्रेण प्रेरणां नीत्वा तस्य अनुसरणमपि अस्माभिः कर्तव्यं तदा एव रामराज्यस्य स्वप्नः पूर्णः भविष्यति। रामराज्ये सर्वत्र समृद्धि धर्माचरणं च आसीत् । रामायणकालस्य समाजः श्रीरामस्य सिद्धान्तान् परिपालयन्ति स्म। कार्यक्रमस्य संरक्षकः मान्यः कुलगुरुः प्रो विजयकुमारसीजीमहोदयः अतिथिनां स्वागतम् अभिनन्दनं च कृतवान्।अतिथिपरिचयः डॉ. पूजा उपाध्याया कृतवती। संयोजनम् आदित्यचौरसिया, त्रिवेणीसंग्रहालयस्य आसीत। संचालनं डॉ. पूजया आभरञ्च डॉ. उपेन्द्रभार्गवेन कृतम्। कार्यक्रमे सर्वे विभागप्रमुखाः, शिक्षकाः, छात्राः, शोधकर्तारः उपस्थिताः आसन्।



प्रथमपुटस्य शेषभागः **संस्कृतस्य बहुआयामी उत्कर्षः...**

ए आईओसी अध्यक्ष प्रो. सरोज भाटे कथितवान् यत् भारतीय प्राच्यविद्या सम्मेलनस्य उद्देश्यं, विना केनचित् क्षेत्रीयेण भाषिकेण इत्यादि भेदभावेन तत्र विशेषेण एशियास्थजनैः अवगंतव्यं यत् इयं समयस्य याचना विद्यते।

श्री श्री १००८ श्री सुगुणेन्द्र तीर्थपाद श्रीपादगुरुः स्वेषु आशीर्वचनेषु भव्यं आयोजनं प्रशंस्य प्रसन्नतां व्यक्तीकुर्वन् उक्तवान् यत् उत्तर भारते भगवान रामः श्रीकृष्णः इव दिव्य महापुरुषाणाम् अवतरणं जातम्। तदीयपरम्परा माध्वाचार्यः इव अनेके परम भक्ताः दक्षिणस्य भूमिं सनाथीकृत्य समग्रभारते प्रसारितम् । अतः एतत् सम्मेलनम् एतानि तात्त्विक दर्शनानि समन्वयीकरोति ।

प्रो कविता होले,जेनरल सेक्रेटरी, प्रो शिवानी वि., लोकल सेक्रेटरी, प्रो वीर नारायण पाण्डुरंगी, अखिल भारतीय विद्वत् परिषद्, बंगलोरू- अध्यक्षश्च इत्येते अपि स्व विचारान् उपस्थापितवन्तः।

उद्घाटन सत्रे केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली द्वारा प्रकाशितस्य पुस्तकद्वयस्य विमोचनं मुख्यातिथिः योगगुरु स्वामी रामदेवः अन्येषां च गण्यमान्यातिथीनां कर कमलैः जातम् । प्रथमं पुस्तकं कुलपतेः प्रो श्रीनिवास वरखेडीवर्यस्य संस्कृतेन लिखितस्य 'शास्त्रपद्धतेः' हिन्दी अनुवादस्य विमोचनं प्रो अजय कुमार मिश्रा अकरोत् अपरं पुस्तकं 'प्राच्यप्रभा भारतविद्या च' इत्यस्य लेखनं ख्यातिप्राप्तः संस्कृत विद्वान् संस्कृत पत्रिका संपादकः श्री नन्द किशोर पत्तर किरे कृतवान् अस्मिन् सम्मेलने सचिव प्रोफेसर शिवानी सूचितवान् यत् अस्मिन् १,१०१ तः अधिकाः प्रतिभागिनः भागं गृहीतवन्तः। ८९१ शोध पत्राणि प्रस्तुतानि। एषु ५११ योगदान संकाय सदस्याः आसन्। अपि च ४२६ शोध विद्वांसश्च। विशेष रूपेण , संयुक्त राज्य अमेरिका, जापान, श्रीलंका इत्येषां विद्वांसः पूर्ण सत्रे प्रभावशालिव्याख्यानानि दत्तवन्तः। यत्र संस्कृतस्य वर्धमान वैश्विक उपस्थितिः प्रकाशिता। स्त्री पुरुष प्रतिनिधित्वं महत्तत्त्वपूर्णम् आसीत् । ७०० संख्यकाः महिला प्रतिभागिन्यः प्रायेण ९११ पुरुषप्रतिभागिनः आसीत। यत् महिलासु संस्कृतस्य वर्धमान लोकप्रियतां दर्शयति। प्रथमदिने २८ प्रतिष्ठित संस्कृत विदुषां एआईसीओ २०२४ सहयोगेन अखिल भारतीय विद्वत् परिषद, बेंगलुरु द्वारा अनेक क्षेत्रेषु तदीय योगदानाय सम्मानने ष्महामहोपध्यायष इव मानद उपाधिः प्रदत्ता। संस्कृत विश्वविद्यालयेभ्यः कुलपति कौनक्लेब , यस्य अध्यक्षता माननीय प्रो. मुरली मनोहर पाठकः अकरोत्। कुलपतिः प्रो. सी .जे .विजय कुमारः , संस्कृत विश्वविद्यालयानां सचिवः संस्कृत विश्वविद्यालयानाम् एकीकृत कार्यक्रमान् प्रति बलं दत्तम्, कुलपति प्रो. रमेश भारद्वाजः पारंपरिक विषयाणाम् तुलनया आधुनिक विषयाणां शिक्षण कार्यभारे वृद्धिर्न जाता इत्युकवतवान। कुलपतिः प्रो. सुकान्त कुमार सेनापतिः, प्रो. प्रह्लाद जोशी प्रो. लक्ष्मीनिवास पांडेयः च राष्ट्र निर्माणे संस्कृतस्य भूमिका, लोकप्रयोग संस्कृताय संवर्धनं दातुं अन्य महत्वपूर्णविषयेषु महत्त्वपूर्णविचारान् उपस्थापयितुं निर्व्यूढा। समापन सत्रे मुख्यातिथिः, श्री दिनेश कामतः, यः सरल मानक संस्कृतस्य (एसएसएस) अग्रदूतेषु एकः सम्मेलनस्य व्यापक प्रभावं प्रशंस्य भारते एके नूतने अभिनवे भारतान्वेषणे औपनिवेशिक मानसिकतां दूरीकर्तुं प्रोत्साहितवान्। सम्मेलने बहव्यः सांस्कृतिक प्रस्तुतयः अपि जाताः, येषु प्रसिद्ध कलाकाराः-निरुपमा राजेन्द्रन द्वारा निर्देशिता एका अद्भुता नृत्य-नाटिका 'तत् भारतम्' अप्यासीत् ,येषु भारतीय संस्कृतिं इतिहासं च जीवितरूपेण मंचितम् । एकं 'यक्षगानम्' अपि प्रदर्शनन जातम्। यद् भगवतःकृष्णस्य बाल्य प्रसंगैः संबद्धम् आसीत्। प्रो. होले बोधितवान् यत् ५२तमम् अखिल भारतीय संस्कृत सम्मेलनं हरिद्वारे आयोजयिष्यते।

## प्राचार्याः प्रो.एम.सी.पाण्डे महोदयाः प्राप्स्यन्ति भारत-नेपाल एनवायरमेंटल लीडरशिप अवार्ड-2024

वार्ताप्रेषकः-डॉ. मूलचन्द्रशुक्लः



रामनगरम्। पीएनजी राजकीय स्नातकोत्तर-महाविद्यालय- रामनगरस्य प्राचार्याः प्रो.एम.सी.पाण्डे महोदयाः भारत-नेपाल एनवायरमेण्टल लीडरशिप अवार्ड-२०२४ इति सम्माननं प्राप्स्यन्ति। एतेभ्य अयं विरुदः (अवार्ड) नवम्बरमासस्य ११ दिनाङ्के नेपालस्थकाठमाण्डू नगरे नेपालस्य विदेशमन्त्रिणा प्रदास्यते।प्रो.पाण्डे महोदयेभ्यः पर्यावरणसंरक्षणाय वन्यजीवसंरक्षणाय च भारत- नेपालदेशयोः मैत्रीसम्मेलने आयोजकेन 'ग्लोबल लीडरशिप फोरम' इत्यनेन सम्माननमिदं प्रदास्यते। अस्मिन्नवसरे महाविद्यालयस्य समस्त- प्राध्यापकाः शिक्षणेतरकार्मिकाश्च प्राचार्येभ्यः प्रो.एम. सी.पाण्डे महोदयेभ्यो शुभकामनापुरस्सरं वर्धापनानि प्रेषितवन्तः। एतस्मात् पूर्वमपि रामनगर-महाविद्यालयस्य प्राचार्याः प्रो.एम.सी.पाण्डे महोदयाः उत्तराखण्ड-सर्वकारद्वारा उच्चशिक्षायामुत्कृष्ट-उल्लेखनीयमवदानाय 'भक्तदर्शन' इत्यनेन पुरस्कारेण ष्प्रिंसिपल ऑफ द ईयरष इत्यनेन पुरस्कारेण च सभाजिताः। एते महात्मा गान्धी राष्ट्रीय ग्रामीण शिक्षा परिषद्, उच्च शिक्षा विभागः,भारत सर्वकार द्वारा 'ग्रीन चौम्पियनशिप अवार्ड' इत्यनेन विरुदेन सम्मानिताः जाताः। सम्प्रत्यपि एते उत्तर प्रदेश राज्येन 'श्री के.एस.अय्यर वाणिज्य गौरव सम्माननम्' इत्यनेन गौरवपूर्णविरुदेन सम्मानिताः ।

प्रथमपुटस्य शेषभागः **संस्कृतस्य संरक्षणेनैव भारतस्य...**

सप्तदशसंस्कृत विश्वविद्यालयेषु पुरातनः सम्पूर्णानन्द विश्वविद्यालयः यः प्रायः २३५ वर्षेभ्योऽपि पुरातनः। मुख्यमंत्री स्व सुशासन बलेन भारतस्य हृदयस्थलाय उत्तर प्रदेशाय एकां नव दिशं दत्तवान। गत दिनेषु उत्तर प्रदेशाय यशस्वी माननीय मुख्यमंत्री संस्कृताभ्युत्थानाय अध्ययनरतेभ्यो विद्यार्थिभ्यः क्रमशः विश्वविद्यालयस्य ३६ संख्यकेभ्यः, वाराणसी जनपदस्य ४२०३ संख्यकेभ्यः अथ च सम्पूर्ण प्रदेशस्य ६९१९५ इत्येभ्यः छात्रवृत्तिं बैंक माध्यमेन प्रदत्तवान्।

कार्यक्रमस्य प्रारम्भे विश्वविद्यालयस्य परंपरानुसारं वेदाचार्येण विद्यार्थिभिश्च मंगलाचरणं (वैदिकं, पौराणिकं) विहितम्।

उक्त समारोहे मुख्य रूपेण काशी विश्वनाथ न्यास परिषदः अध्यक्षः प्रो० नागेन्द्रनाथ पाण्डेयः, पद्मश्रीप्रो० वशिष्ठ त्रिपाठी, मंत्री श्री रविन्द्र जायसवालः, श्री दयाशंकर मिश्रः 'दयालु' विधायक डॉ० नीलकंठ तिवारी, श्री सौरभ श्रीवास्तवः, श्री सुनील पटेलः, श्री त्रिभुवन रामः, जिला पंचायत अध्यक्षः श्रीमती पूनम मौर्या, विधान परिषद श्री हंसराज विश्वकर्मा, श्री अम्बरीश भोला, महंत शंकरपुरी संतोष दासः, बालकदासः, धर्मसंघस्य अध्यक्षः पंडित जगजीतन पाण्डेयः, अपर मुख्य सचिवः (गृह, वित्तं एवं माध्यमिकः) श्री दीपक कुमारः, विश्वविद्यालयस्य कुलसचिवः श्री राकेश कुमारः, डॉ० कमलेश झा. शिक्षा विभागस्य अधिकारिभिः, विश्वविद्यालयस्य आचार्यैः, अधिकारिभिः कर्मचारिभिः छात्रच्छात्राभिः च सहिताः विद्यालयानां प्रधानाचार्याश्च उपस्थिताः।

# अखिलभारतीय-सांस्कृतिक-शैक्षणिक-खेल-स्पर्धानाम् उद्घाटनं महामहिम-माननीयेन राज्यपालेन श्रीमंगुभाईपटेल-वर्येण कृतम्

भोपाल। केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे अखिलभारतीययुवमहोत्सवः-२०२४'इत्यस्य उद्घाटनं माननीयेन राज्यपालेन अक्टूबरमासस्य १७ तमे दिनाङ्के विहितम् ।कार्यक्रमेऽस्मिन् सम्मानितातथयः प्रो. मदनमोहनझा-महोदयाः, अधिष्ठातारः छात्रकल्याणम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली, सारस्वतातिथयः प्रो. मिथिलाप्रसादत्रिपाठीमहोदयाः, पूर्वकुलपतयः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जैयिनी



तथा च विशिष्टातिथयः श्रीआशुतोषजोशी-महोदयाः, संस्थापकाः, भारतीययुवासंसद्, जयपुरम् इति एते समुपस्थिताः ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकाः प्रो. रमाकान्तपाण्डेयमहोदयाः समेषामतिथीनां स्वागतमकुर्वन् तथा चास्य कार्यक्रमस्य विस्तृतं विवरणमदुः । माननीयेन राजयपालेन प्रोक्तं यत् संस्कृतज्ञानेनैव राष्ट्रं विश्वे प्रतिष्ठापयितुं शक्यते । अनेनैव राष्ट्रीयान्ताराष्ट्रीयसमस्यानां निवारणमपि शक्यम् । मध्यप्रदेशस्य प्रथमनागरिकत्वेनाहं भवतां समेषां स्वागतमभिनन्दनं करोमि ।

प्रो. मदनमोहनझा-महोदयेन प्रोक्तं यत् केन्द्रीयसंस्कृतविश्वविद्यालयः पूर्णरूपेण राष्ट्रीयशिक्षानीतिः२०२० इत्याधारेण पाठ्यक्रमं सञ्चालयति तथा च माननीयानां प्रधानमन्त्रीमहोदयानां स्वप्नम् एक भारत श्रेष्ठ भारतइति सिद्धान्तमनुपालयति । विश्वविद्यालयस्य कुलपतीनां प्रो. श्रीनिवासवरखेडी-महोदयानां सत्प्रयासेन विधिः, आयुर्वेदः संस्कृतं सिविल-सेवा बीए ऑनर्स पाठ्यक्रमः समारब्धः । अवसरेऽस्मिन् 'भारतीय ज्ञान परंपरा एवं शिक्षक शिक्षा'तथा 'सर्व समावेशी शिक्षा के परिप्रेक्ष्य में महर्षि दयानंद सरस्वती'इतिद्वयोः ग्रन्थयोःविमोचनं माननीयेन राज्यपालेन कृतम् । भोपालपरिसरस्य सह-निदेशकाः प्रो. नीलाभतिवारी-महोदयाः कार्यक्रमेऽस्मिन् उपस्थितेभ्यः सर्वेभ्यः कृतज्ञतां समर्पयन्। अस्योद्घाटनसत्रस्य सञ्चालनं डॉ. रमणमिश्रमहोदयेन कृतम् । उद्घाटनसत्रप्रागेव समेषां प्रतिभागिनां शोभायात्रा आसीत्। क्रमेऽस्मिन्नेव मशालप्रज्ज्वालनेन ध्वजारोहणेन सह परिसरनिदेशकाः समेभ्यः प्रतिभागिभ्यः प्रतिज्ञाम् अकारयन्।

आयोजितासु स्पर्धासु राजस्थानस्य हरियाणा-राज्यस्य उत्तरप्रदेशस्य तथा च मध्यप्रदेशस्य स्पर्धालवः छात्राः प्रतिभागं करिष्यन्ति ।अत्रनिर्णायकत्वेन विशिष्टाः विद्वान्सः समाहूताः सन्ति।

## प्राचार्यः प्रो.एम.सी.पाण्डेमहोदयः श्री के.एस.अय्यर वाणिज्यगौरवसम्मानेन डॉ.दीपकखातीमहोदयः वाणिज्यगौरवसम्मानेन च सम्मानितौ

वार्ताप्रेषकः- डा. मूलचन्द्रशुक्लः

रामनगरम्। उत्तर-प्रदेशस्थे पीलीभीतस्थाने उपाधि-महाविद्यालये रामनगरस्थ-पीएनजी राजकीय-स्नातकोत्तर-महाविद्यालयस्य प्राचार्य प्रो.एम.सी.पाण्डे महोदयेभ्यः श्री के.एस.अय्यर वाणिज्य गौरव सम्माननं प्रदत्तम्।तत्रैव वाणिज्य संकाये असिस्टैण्ट प्रोफेसर डॉ.दीपक खाती महोदयः वाणिज्य गौरव इति सम्मानेन सभाजितः। उभाभ्यामपि सम्माननमिदम् उत्तरप्रदेशस्थ-पीलीभीतनगरस्थ- वाणिज्य-सङ्काय-उपाधि महाविद्यालय




द्वारा समायोजितायां द्विदिवसीय- अन्ताराष्ट्रियसङ्गोष्ठ्याम् अक्टूबरमासस्य पञ्चविंशतिदिनाङ्के प्रदत्तम्। अस्मिन् समारोहे अतिविशिष्टातिथिरूपेण प्राचार्यमहोदय अवोचत् यत् अहम् अनेन सम्मानव्याजेन इतोप्यधिकमुत्कृष्टकार्यकरणाय उत्साहितो भविष्यामि। वाणिज्यविषये शोधार्थम् अध्यापनार्थं विशिष्टावदानार्थञ्च उक्तसम्मानाभ्यां सभाजितौ। अस्मिन् उपलब्धि-अवसरे प्राचार्य- प्रो.पाण्डे महोदयेभ्यः डॉ.खाती महोदयेभ्यश्च समस्त- महाविद्यालय-परिवारेण सह प्रोफे. एस. एस. मोर्यः डा. मूलचन्द्रशुक्लः डा. डी. एन. जोशी इत्यादयः शुभकामनापुरस्सरं नैकानि वर्धापनानि प्रेषितवन्तः।

# समापनसमारोहः

भोपाल। केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरेण आयोज्यमानस 'अखिलभारतीय-क्रीडा-सांस्कृतिक- शैक्षिक-स्पर्धासुविगत-दिनद्वयात् चत्वारिंशत् प्रतियोगितानां प्रथम-द्वितीय-तृतीय-पुरस्कारप्रदानेन




समापनसमारोहः सम्पन्नः ।

-केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरः सप्तदश सुवर्णपदकम्, अष्टौ रजतपदकम् प्राप्य प्रथमस्थाने वर्तते।

-केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरः अष्टौ सुवर्णपदकं नव रजतपदकं प्राप्य द्वितीये स्थाने अस्ति।

-चोटीपुरा स्थितः श्रीमद्दयानन्द-कन्या-गुरुकुल-महाविद्यालयः सप्त सुवर्णपदकं चत्वारि रजतपदकं प्राप्य तृतीये स्थाने अस्ति ।

समापनसमारोहस्य प्रारम्भे एव भोपालपरिसरस्य सह-निदेशका: प्रो. नीलाभतिवारी-महोदया: कार्यक्रमेऽस्मिन् उपस्थितानामतिथीनांवाक्कुसुमैः स्वागतं कुर्वाणा: उक्तवन्तः यत् आभिः स्पर्धाभिःछात्राणां पञ्चविधविकासः भवति ।अखिलभारतीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धायाः संयोजकाः प्रो.भारतभूषणमिश्र-महोदयाः दिनत्रयात्मककार्यक्रमस्य प्रतिवेदनं प्रास्तुवन् ।

कार्यक्रमस्यास्य मुख्यातिथयः प्रो. अभिराजराजेन्द्रमिश्र-महोदयाः, पूर्वकुलपतयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी उक्तवन्तः यत् वर्तमानकाले संस्कृतशिक्षकानां छात्राणाञ्च मुख्यमुत्तरदायित्वमस्ति यत् ते शब्दज्ञानराशिः वर्धयेयुः। संस्कृतभाषया एव भारतं विश्वगुरुत्वं प्राप्तुं शक्नोति। अस्माकं शास्त्राणि उपनिषदः पुराणानि प्रत्यक्षप्रमाणानि सन्ति ।

कार्यक्रमस्य सारस्वतातिथयः प्रो. शिशिरकुमारपाण्डेय-महोदयाः, कुलपतयः, जगद्गुरुरामभद्राचार्यदिव्याङ्गराज्यविश्वविद्यालयः, चित्रकूटम् उक्तवन्तः यत् अध्यनेन सह पाठ्यसहगामिक्रियाः अत्यन्तानिवार्याः सन्ति अनया शारीरिकं मानसिकं सामञ्जस्यं संस्थापयितुं शक्यते । स्वस्थमनसः एव सर्वाणि कार्याणि सम्यक् रूपेण सम्पादयितुं शक्यते ।

कार्यक्रमस्य विशिष्टातिथयः प्रो. रा.गा. मुरलीकृष्ण-महोदयाः, कुलसचिवाः, केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली उक्तवन्तः यत् हर्षस्य विषयोऽयं यत् संस्कृतच्छात्राः शास्त्राध्ययनेन सह विभिन्नगतिविधिषु भागं स्वीकृत्य सर्वश्रेष्ठं प्रदर्शनं कुर्वन्ति । अधुना इयं स्पर्धा चतुर्षु वलयेषु सम्पन्ना भवति । अतः बहवः स्पर्धालवः भागं स्वीकुर्वन्ति । कार्यक्रमेऽस्मिन् सम्मानितातिथित्वेन डॉ.सत्यजीतपाण्डेय-महोदयाः समुपस्थिताः आसन्।

समापनसमारोहकार्यक्रमस्य अध्यक्षाः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकाः प्रो. रमाकान्तपाण्डेय-महोदयाः सर्वप्रथमम् अध्यक्षीयोद्बोधनेन उपस्थितेभ्यः सर्वेभ्यः प्रतिभागिभ्यः मार्गदर्शकेभ्यः आयोजनसमितिसदस्येभ्यः परिसरप्राध्यापकेभ्यश्च अभिनन्दनं कृतवन्तः । तथा चोक्तवन्तः यत् शास्त्रे यत् निहितं ज्ञानमस्ति तदस्माकं व्यवहारेऽपि आगच्छेत् तदैवास्माकं व्यक्तित्वं विकसति । आचार्यपाण्डेयमहोदयाः विश्वविद्यालयस्य माननीयेभ्यः कुलपतिभ्यः प्रो. श्रीनिवासवरखेडी-महोदयेभ्यः अपि कृतज्ञतां समर्पयन् येषां सत्प्रेरणया एव विश्वविद्यालयपरिसरेषु एतादृशाः कार्यक्रमाः सम्पन्नाः भवन्ति। अवसरेऽस्मिन् भोपालपरिसरेण प्रकाशिता शोधपत्रिका लोकार्यार्पिता । मञ्चस्थैः अतिथिभिः मार्गदर्शकाः सम्मानिताः। पुरस्कारवितरणस्य घोषणा प्रो.धर्मेन्द्रकुमारसिंहदेव-महोदयेन कृता । समापनसत्रेऽस्मिन् धन्यवादज्ञापनं डॉ.मोहिनी-अरोड़ा-महोदया कृतवती तथा चास्य सत्रस्य सञ्चालनं प्रो.प्रदीपकुमारपाण्डेय-महोदयेन कृतम् ।अवसरेऽस्मिन् नगरस्य विशिष्टविद्वान्सः सामाजिकाः तथा परिसरस्य सर्वेऽपि प्राध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन् ।

# दयालसिंहमहाविद्यालय-करनालनगरस्य संस्कृतस्य विद्यार्थिनाम् अद्वितीयं प्रदर्शनम्

(वत्सदेशराजशर्मा)

दयालसिंहमहाविद्यालय-करनालनगरस्य संस्कृतविभागस्य विद्यार्थिभिः कुरुक्षेत्रविश्वविद्यालयस्य चतुर्थसत्रस्य परीक्षायां अद्वितीयं प्रदर्शनं कृत्वा महाविद्यालयस्य नाम प्रकाशितम् । संस्कृतविषये वर्षा तथा च फरजाना इत्येताभ्यां छात्राभ्यां १०० प्रतिशताङ्काः प्राप्य न केवलं स्वमहाविद्यालयस्य अपितु सम्पूर्णजनपदस्य गौरवं वर्धितम्। एताभ्यां छात्राभ्यां ५० अङ्केषु ५० अङ्काः प्राप्ताः, येन ताः संस्कृतविषये उत्कृष्टतां प्रदर्शितवन्त्यः। सार्धमेव नीतू इत्येनया छात्रया अपि ५० अङ्केषु ४९ अङ्काः प्राप्य स्वमेधायाः प्रदर्शनं कृतम्।



अस्य विशिष्टस्य प्रदर्शनस्य निमित्तं महाविद्यालयस्य प्राचार्या डॉ. आशिमा-गक्खड़-महोदया संस्कृतविभागस्य तथा विशेषतो विभागे कार्यरतस्य प्रो. दीपकशास्त्रिणः शिक्षणकौशलस्य मुक्तकण्ठेन प्रशंसा कृता। सा उक्तवती यद् विद्यार्थिभिर्भविष्येऽपि एतेनैव प्रकारेण संस्कृताध्ययने उत्कृष्टं प्रदर्शनं करणीयम्।

एते मेधाविनः-वर्षा, फरजाना, नीतू च-महाविद्यालयेन संस्कृतविभागेन च सम्मानिताः अभवन्। अस्मिन्नेव अवसरस्य महाविद्यालये संस्कृतविषये अधिकाधिकं विद्यार्थिभिः अध्ययनं करणीयमिति प्रेरणायुक्तं सन्देशं प्रकटितवन्तः। दयालसिंहमहाविद्यालयस्य एतद् गौरवमयं प्रदर्शनमस्य सिद्धिरस्ति यद् अस्मिन् महाविद्यालये शिक्षापद्धतिरुत्कृष्टा अस्ति, यत्र संस्कृतविभागस्य शिक्षका विद्यार्थिन उच्चतमैः शैक्षिकमानदण्डैः सम्यक् रूपेण प्रापयितुं निरन्तरं प्रयत्नं कुर्वन्ति।अस्मिनेवावसरविशेषे संस्कृतप्रतियोगितासु भागं ग्रहीतवतो विद्यार्थिनः प्रथमो, द्वितीयस्तृतीयस्तथा च प्रोत्साहनपदकैरपि सम्मानिता अभवन्, येन तेषां उत्साहवर्धनं सम्पन्नं, तथा भविष्ये संस्कृतभाषायाः प्रति तेषां रुचिरधिकतरं वर्धिष्यते।

# पाणिनिसंस्कृतविश्वविद्यालये अखिलभारतीयसंस्कृतकविसमवायस्य आयोजनं जातम्

डॉ.दिनेश चौबे, उज्जयिनी



महर्षिवाल्मीकिजयन्ति महोत्सवस्यवसरे उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य संस्कृतसाहित्यविभागेन संस्कृतकविसमवायस्य आयोजनं कृतम् आसीत्। विश्वविद्यालयस्य कुलगुरुः प्रो विजयकुमारसीजीमहोदयस्य संरक्षणे आयोजितस्य कविसमवायस्य आध्यक्षं प्रो. ई.आर.नारायणनमहोदयः आचार्यः, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूरपरिसरः, केरलं निर्वहत। काननवर्णनम् शीर्षकाधारितकाव्यपाठं च कृतवान् । कविसमवाये देशस्य नवराज्येभ्यः कविभिः स्वविरचितानि सुन्दराणि पद्यानि प्रस्तुतानि। कवीनां सुमधुराणां काव्यानां पाठेन कविसमवायः सफलः अभवत्। साहित्यविभागप्रमुखः कार्यक्रमसंयोजकः च डॉ. तुलसीदासपरोहामहोदयः स्वागतकवितापद्येन सम्मेलनस्य शुभारंभं कृतवान् तदनन्तरं भोपालतः डॉ लक्ष्मीनारायणपाण्डेयः, आंध्रप्रदेशतः डॉ.शिवरामभट्टः,अहमदाबादतः डॉ. प्रीतिपुजारा, दरभङ्गातः डॉ. शशिकांततिवारी, उत्तरप्रदेशतः, डॉ.अरविन्दः तिवारी शुभं रामोत्सवं दृष्ट्वा मनो मे साम्प्रतं हृष्टं हिमाचलतः डॉ. श्रीनाथधरद्विवेदी विलोक्य राममन्दिरम् उज्जैनतः डॉ. पूजा उपाध्यायः डॉ. पूजागौरः सुन्दरं ललितपूर्णञ्च काव्यं प्रस्तुतवत्याः । आभाषीयपटलमाध्यमेन आयोजिते कविसमवाये डॉ. अखिलेशकुमारद्विवेदी, डॉ. शुभमशर्मा, डॉ. उपेन्द्रभार्गवः, डॉ. संकल्पमिश्रः, अन्ये प्राध्यापकाः, संस्कृतप्रेमिणः कवयः, शोधच्छात्राः छात्राः च कवितापाठस्य आनन्दं नीतवन्तः। संचालनं साहित्यविभागस्य डॉ. गंगाशरणव्यासेन आभारनिवेदनञ्च कार्यक्रमसंयोजकेन डॉ. तुलसीदासपरोहामहोदयेन विहितम्।

# "आधुनिकसंस्कृतसाहित्ये अभिनवप्रवृत्तयः" विषये एकदिवसीया संगोष्ठी आयोजिता

२१अक्टूबर २०२४ उत्तरप्रदेशसंस्कृतसंस्थान, लखनऊ एवं संस्कृत विभाग, ब्रह्मवर्त पी.जी. कानपुरनगरस्थमन्धना महाविद्यालयस्य संयुक्ताश्रयेन संस्कृतसाहित्यस्य गौरवशालिनी परम्परा इत्यस्मिन् विषये आयोज्यमाणा संङ्गोष्ठी सुसम्पन्ना। प्राचीनकालात् निरन्तरसमृद्धि प्राप्नोति। वैदिकपरम्परया सह लौकिकसाहित्यस्य प्रचारार्थं सम्पूर्णे विश्वे सहस्राणि साहित्यग्रन्थाः प्रकाशिताः। लौकिकसाहित्यस्य




प्रथमकविमहर्षिवाल्मीकिना आरब्धा परम्परा भासः, कालिदासः, भारविः, भवभूतिः, माघः, अश्वघोषः इत्यादि महाकविनां विश्वप्रसिद्धग्रन्थैः प्रफुल्लिता, प्रफुल्लिता च। चीनस्य स्वातन्त्र्योत्तरकालेषु अभिनव कालिदास, विश्वप्रसिद्ध सनातनकवि महामहोपाध्याय इत्यादीनां महाकविनां सृजनशीलतायाः सह एषा अक्षुण्णपरम्परा प्रो. रेवप्रसादद्विवेदी, प्रो.अभिराजराजेन्द्रमिश्रः, प्रो.राधावल्लभ त्रिपाठी, प्रो. रहसविहारीद्विवेदी आदि। अद्यत्वेऽपि प्रतिवर्षं आधुनिकसन्दर्भं मनसि कृत्वा समकालीनविषयेषु संस्कृतसाहित्यस्य सहस्राणि कृतयः प्रकाश्यन्ते। "आध ुनिक संस्कृत साहित्यम्।"

अस्य एकदिवसीयस्य संगोष्ठ्याः उद्देश्यं समाजस्य समक्षं ष्नवीनप्रवृत्तयःष् महाविद्यालयस्य प्राचार्यः प्रो. वी.के प्रधानाध्यापकेन वस्त्राणि स्मृतिचिह्नानि च दत्तानि।

प्राचार्यः आधुनिकसंस्कृतसाहित्ये क्रियमाणानां नवीनप्रयोगानाम् प्रशंसाम् अकरोत्, संस्कृतसाहित्यस्य विकासाय शुभकामनाम् अपि प्रकटितवान् । संगोष्ठ्यां मुख्यवक्तृरूपेण वि.एस.एन.डी. कॉलेज कानपुरस्य संस्कृतविभागस्य वरिष्ठप्राध्यापिका प्रो. शोभामिश्रा इत्यनया विषये मुख्यव्याख्यानं प्रस्तुतं तथा विशेषव्याख्यानं डी.ए. वि. महाविद्यालयः कानपुरस्य संस्कृतविभागस्य वरिष्ठप्राध्यापक; एवं अध्यक्ष प्रो. विनोदकुमारपाण्डेयेन कृतम् संगोष्ठ्यां उपस्थितानां अन्येषु विशिष्टातिथिषु संस्कृतिभारतीयाः पूर्वोत्तरप्रदेशस्य मुख्यातिथिः विशेषातिथिरूपेण उपस्थितः आसीत् । अतिथिरूपेण उपस्थितः क्षेत्रसङ्गठनमन्त्री श्री प्रमोदपण्डितः सरस्वतः, दयानन्द वैदिकमहाविद्यालयस्य दयानन्दवैदिकमहाविद्यालयस्य उरई,जालौन इत्यादिभ्यः डॉ.सर्वेशकुमारशाण्डिल्यः अपि वक्तव्यं दत्तवन्तः। संगोष्ठी सचिवः तथा संस्कृतविभागः ब्रह्मवर्त पी.जी. स्वागतसम्बोधनं तथा मन्ध नामहाविद्यालयस्य सहायकप्राध्यापकः डॉ. चन्द्रकिशोरशास्त्रिणा प्रोक्तम्। सङ्गोष्ठ्याः संयोजकत्वेन श्रीवामदेवसंस्कृतमहाविद्यालय, बाँदातः डॉ. रत्नेशत्रिवेदी उ०प्र०संस्कृतसंस्थान-लखनऊ इत्यस्य प्रतिनिधि रूपेण समागताः। मुख्यतया डॉ. अमितकुमार दुबे, डॉ. बप्पा अधिकारी, डॉ. दिनेशकुमारगौतमः, डॉ. दिव्याभदौरिया इत्यादयः समस्तप्राध्यापकाः एवं महाविद्यालयस्य कर्मचारिणः सहितं नैके छात्राः अस्यां प्रतिभागं कृतवन्तः।

# इन्द्रविजयग्रन्थे इन्द्रस्य अभ्यर्थनायाः महत्त्वम्

-डॉ. लक्ष्मीकान्तविमलः

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन अक्टूबरमासस्य २६तमे दिनांके सायंकाले ५ वादनतः ७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझामहोदस्य इन्द्रविजयस्य चतुर्थाध्यायस्य विविधविषयं चाधारीकृत्य इयं राष्ट्रिया संगोष्ठी प्रवर्तिता।

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदविभागस्य आचार्यः प्रो. रामानुज-उपाध्यायः अकथयत् यत् अस्मिन् दस्युनिग्रहे नामके चतुर्थे प्रक्रमे इन्द्रस्य महत्कार्यम् चित्रितम् अस्ति। इन्द्रः सर्वप्रथमं पुरूरवसः पुत्रस्य आयोः शत्रुः वेशः आसीत्। इन्द्रः तस्य वेशस्य विनम्रं कृतवान्। तदन्तरं सव्यनामकस्य आर्यस्य शत्रुः



षड्गृभिः आसीत्। इन्द्रः शत्रोः षड्गृभेः दमनं कृतवान्। प्रमाणपूर्वकं सर्वं दस्यूनां आर्याणां मध्ये वैरिभावं तस्य परिहारोऽपि कृतः विद्यते।

पौरूरवसस्यायोः शत्रुं वेशं तु नम्रतानमयत् ।

षड्गृभिमरन्धयत् तं यः सव्यायार्ह्यत्पूर्वम् ।।इन्द्रविजयः पृ. ४६९, का. १

वाराणसीस्थस्य काशीहिन्दूविश्वविद्यालयस्य चिकित्साविज्ञानसंकायस्य आयुर्वेदसंकायस्य आचार्यः प्रो. चन्द्रशेखरपाण्डेयः अब्रवीत् यत् इन्द्रविजयः ग्रन्थः भरतवर्षस्य इतिहासः भूगोलः अस्ति। तेन चित्रमाध्यमेन व्याख्यानं कृतम्। आयुराजस्य परिचयः अत्र विद्यते। आयुः गन्धर्वराजस्य पौत्रः पुरूरवसः पुत्रः आसीत्। पुरूरवा बुधस्य पुत्रः आसीत्। स आयुः प्रतिष्ठाननगरस्य गन्धर्वस्य राजा आसीत्।

गन्धर्वराजपौत्रो बुधपुत्रो यः पुरूरवा राजा ।

तत्पुत्र आयुरासीत् गन्धर्वेशः प्रतिष्ठाने ।। तत्रैव, पृ. ४४२, का. १

प्रतिष्ठानपुरस्य भौगोलिकी सीमा कीदृशी आसीत् इत्यस्य वर्णनम् अत्र अवलोकनीयम् अस्ति। गौरीनद्याः समीपे मूजवान् पर्वतः आसीत्। तस्य पर्वतस्य पार्श्वभागे गान्धारनामकः प्रदेशः विद्यते स्म। गान्धारदेशे एव आयुराजस्य प्रतिष्ठाननगरम् असीत्। गौरीनदीसमीपे मूजवतः पर्वतादर्वाग्देशे।

गान्धारे प्रागासीदिदं प्रतिष्ठानमायुपुरम् ।।तत्रैव, पृ. ४४२, का.२

कपिलवस्तुनः सिद्धार्थनगरस्य सिद्धार्थविश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्या डॉ. आभाद्विवेदी अवदत् यत् दस्युनिग्रहनामके प्रक्रमे इन्द्रस्य कृते ऋग्वेदात् सूक्तिः अस्ति। तत्र नीपातिथिः इन्द्रस्य अभ्यर्थनां कृतवान्। इन्द्रस्य निवासस्थानं द्युलोकः अस्ति। द्युलोकतः इन्द्रः आगत्य दस्यून् हत्वा पुनः द्युलोकं गच्छतु।

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम्।

दिवो अमुष्य शासतो दिवं यय दिवावसो।। तत्रैव, पृ. ४१७

केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य त्रिपुरानगरस्य साहित्यविभगस्य सहायकाचार्यः डॉ. स्वर्गकुमारमिश्रः दस्युनिग्रहनामकस्य प्रक्रमस्य कुत्सनामकस्य आर्यस्य सखा इन्द्रः आसीत्। सिन्धुनद्याः पश्चिमे तटे कुत्सस्य राजधानी आसीत्। बहवः दस्यवः तत्र आगत्य कृषिक्षेत्रस्य नष्टं कृतवन्तः नद्याः स्रोतम् अरुन्धन। तर्हि राजा कुत्सः देवराजम् इन्द्रं प्रार्थयामास। इन्द्रः तं कुत्सं स्वबलेन अरक्षत्। दस्युनिग्रहक्रमे इन्द्रः यत्र यत्र गतवान् तस्यापि विस्तृतं वर्णनं समुपलभ्यते।

कौत्से राष्ट्रे दस्युभिः सिन्धुपश्चात्प्रान्ते नानोपद्रवा अक्रियन्त ।

क्षेत्राणां चाप्स्रोतसां चावरोधस्ताणांनादिदस्तूपदुर्निग्रहाश्च।। तत्रैव, पृ. ४२२, का. १

जयपुरस्थस्य वैदिकशोधसंस्थानस्य वरिष्ठाध्येतृवर्या डॉ श्वेतातिवारी कथितवती यद् इन्द्रविजयनामके ग्रन्थे दस्युनिग्रहनामके अध्याये दस्यूनाम् अभिनवा व्याख्या अस्ति। आर्यस्य प्रपीडनाय अनार्यः दस्युः महान्तम् उपद्रवं रचयामास। षड्गृभिः शुष्णश्च आर्यसव्यं पीडितवान्, वेशनामकः दस्युः पुरूरवसः पूत्रम् आयुराजं पीडितवान्, पिप्रुः नामकः दस्युः वैदथिनम् ऋजिश्वानं पीडितवान्, बलबान् मृगयः शूशुवान् पीडितवान्।

सव्यं षड्गृभिशुष्णौ वेशस्त्वायुं पुरूरवःपुत्रम्।

वैदथिनमृजिश्वानं पिप्रुर्मृगयश्च शूशुवान् व्यरुजन् ।। तत्रैव पृ. ४०२, का. ४

अत्र अनेकदस्यूनां नामानि संकलितानि सन्ति तथैव अर्याणां नामानि संकलितानि। तस्य कृते वैदिकसूक्तस्य प्रमाणं समुपलभ्यते।

जवाहरलाल-नेहरू-विश्वविद्यालयस्य संस्कृत-एवं-प्राच्यविद्या-अध्ययन-संस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लवर्यः कार्यक्रमस्य अध्यक्षः आसीत् । गन्धर्वनामके देशे आर्यः निवसति स्म । तम् आर्यं व्याकुलकरणाय अपगणाः गन्धर्वदेशं समागत्य नानाविविधां मानवविरुद्धचेष्टाम् अपालयन्। अपगणशब्दात् 'अफगान' इत्यस्य ग्रहणम् अस्ति।

एतेऽपगण-प्रमुखा आर्यान् गन्धर्व-देश-वास्तव्यान् ।

शश्वत् प्रपीडयन्तो व्याकुलयाञ्चक्रुरत्युग्राः ।। तत्रैव, का. २

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य पौरोहित्यविभागस्य आचार्यः प्रो. रामराज-उपाध्यायवर्यः सस्वरं वैदिकमङ्गलाचरणं कृतवान् कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान् । अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

# संस्कृताध्ययने बहवः रोजगाराः वर्तन्ते - डॉ. सर्वेशकुमारशांडिल्यः

वार्ताहरः आचार्यदीनदयालशुक्लः

अक्षरवाणी/लखनऊ/उत्तरप्रदेशसंस्कृतसंस्थानद्वारा निदेशकस्य विनयश्रीवास्तवस्य मार्गदर्शने संचालितायाः ऑनलाइन-प्रशिक्षण-पाठ्यक्रम-निर्माणयोजनांतर्गते सरलसंस्कृतसंभाषणकक्षायां प्रेरणासत्रस्य शुभारंभः प्रशिक्षुना स्वात्या सरस्वतीवन्दनया अभवत् । संस्थानगीतिकां पूर्णिमा स्वागतगीतं गायत्रीशांक्ला कृतवती च। आगतानाम् अतिथीनां मुख्यवक्तृणां स्वागतं परिचयं च समन्वयकः दिव्यरंजनः कृतवान् । सत्र-संचालनं प्रशिक्षकः विनयप्रकाशतिवारी कृतवान्। कक्षागत-अनुभवकथनं साक्षी ऐश्वर्या-खर्डेनविसः च अथच संस्कृतलघुकथां चन्द्रकलानागरः विनयापाटिलः प्रस्तुतवती च। गीता-ध्यानश्लोकम् राजलक्ष्मी महोदया प्रस्तुतवती। प्रेरणासत्रस्य मुख्यवक्तारः दयानंदवैदिकमहाविद्यालयः, उरई (जालौन) इत्यस्य संस्कृतविभागध्यक्षः एवं प्रवक्ता डॉ. सर्वेशकुमारशाण्डिल्यमहोदयाः स्वकीये वक्तव्ये उपस्थितान् जनान् उक्तवन्तः यत् संस्कृतम् अस्माकं भारतीयसंस्कृत्याः धरोहरमस्ति। अस्माकं अस्य उपरि गर्वानुभूतिः भवेत् च। अस्य प्रचारः प्रसारः अस्माकं दायित्वमस्ति। यदा अस्माकं संस्कृतिः स्वयमेव परिपूर्णा अस्ति चेत् वयं पाश्चात्यसंस्कृत्याः अनुसरणं किमर्थं कुर्मः ? ते स्वकीये वक्तव्ये कानिचित् उदाहरणानि सम्मिलितं कुर्वन्तः प्रशिक्षुकान् बोधितवन्तः यत् अस्माभिः सर्वदा सरलरीत्या अभिनयेन सह वक्तव्यम् च। अन्यान् जनान् अपि संस्कृतं पठितुं प्रेरणीयम्। जनाः संस्कृते रोजगाराणां विषयेषु अपि जागरूकाः करणीयाः । प्रशिक्षकः ओमदत्तद्विवेदी आगतानां अतिथीनां धन्यवादं ज्ञापितवान्। कार्यक्रमेऽस्मिन् उत्तरप्रदेश संस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रशासनिकाधिकारी जगदानंदझा, दिनेशमिश्रः, योजनाप्रमुखः भगवानसिंहः, प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः, समन्वयकाः धीरजमैठाणी, दिव्यरंजनः तथा राधाशर्मा, प्रशिक्षकौ गणेशदत्तद्विवेदीशशिकान्तौ इत्यादयः उपस्थिताः आसन् । शान्तिमंत्रं आर्यनद्विवेदी, सूचनादानं प्रशिक्षिका दीपमालातिवारी तकनीकी-सहयोगं प्रशिक्षिका डॉ. स्तुतिगोस्वामी कृतवन्तः ।

# पटियालाजनपदस्य भादसोंनगरे संस्कृतस्य प्रचारार्थं सम्पर्क-अभियानं सम्पन्नम्

अजय कुमार आर्य

पञ्जाबप्रान्ते संस्कृतस्य प्रचारार्थं संस्कृतभारतीपटियालाजनपदस्य मन्त्री श्री गगनदीपपाठकेन भादसोंखण्डे सम्पर्क-अभियानं कृतम् । अस्मिन् सम्पर्क-अभियाने द्वयोः विद्यालययोः प्राचार्यैः सह सम्पर्कः कृतः ।सर्वकारी उच्चतं विद्यालयस्य प्राचार्येन श्रीप्रीतिन्दरघईमहोदयेन सह संस्कृतविषये चर्चा अभवत्। सः विद्यालये संस्कृतसंभाषणशिबिरस्य आयोजने विशेषरुचिं दर्शितवान् , विद्यालये शीघ्रमेव संस्कृतसम्भाषणशिबिरस्य आयोजनं भविष्यति। एतदतिरिक्तं नगरस्य अन्य विद्यालये यंग-फॉर्मर-पब्लिकविद्यालये अपि प्रवासः अभवत्। तत्रापि संस्कृतसम्भाषणशिबिरस्य विषये चर्चा अभवत्। भादसोंगोशालायाः अध्यक्षः श्री अमितकोहलीमहोदयेन सह अपि मेलनं अभवत्। सः गौशालायां गीताकेन्द्रस्य आरम्भार्थं स्वस्य सहमतिम् अददात, शीघ्रमेव गौशालायां गीतकेन्द्रस्य आरम्भः भविष्यति। तदनन्तरं नगरे बहूनां जनाभिः सह संस्कृतभारतीसङ्गठनविषये तस्य कार्यविषये च चर्चा अभवत्। अस्मिन् प्रवाससमये नगरविस्तारकः श्री अरविन्दः अपि आसीत्।



# सम्मेलननिमित्तं पटियालानगरे प्रान्तगोष्ठी सम्पन्ना

संस्कृतभारतीपंजाबप्रान्तस्य प्रान्तसम्मेलननिमित्तं पटियालानगरे गोष्ठीसम्पन्ना। अस्यां गोष्ठ्यां संस्कृतभारत्याः उत्तरक्षेत्रसंघटनमन्त्री नरेन्द्रकुमारः मुख्यरूपेण उपस्थितः। गोष्ठ्यां सम्मेलनस्य रूपरेखायाः विषये चर्चा जाता।



मन्त्रिणा उक्तं यत्- पंजाबप्रान्ते संस्कृतस्य वातावरणनिर्माणाय, संस्कृतस्य प्रचार-प्रसाराय च अस्माभिः प्रयासाः करणीयाः। अस्मिन् अवसरे सम्मेलनस्य सज्जतायाः विषयेऽपि चर्चा जाता। संस्कृतभारतीपंजाबस्य प्रान्ताध्यक्षः डॉ. वीरेन्द्रकुमारः विभिन्नेभ्यः कार्यकर्तृभ्यः सम्मेलनाय दायित्वान् दत्तवान्। अधिकारिगणाः आयोजनस्थलस्य निरीक्षणम् अपि कृतवन्तः। अस्मिन्नवसरे पंजाबप्रान्त-मन्त्री संजीवश्रीवास्तवः, प्रान्तसह-मन्त्री अजय-आर्यः, पटियालाविभागसंयोजकः डॉ. ओमनदीपः, पटियाला सम्पर्कप्रमुखः डॉ. रविदत्तः, शिक्षणप्रमुखः डॉ. राहुलादयः उपस्थिताः आसन्।

# अखिलभारतीयप्राच्यविद्यासम्मेलने वैदिकगणस्य महाराष्ट्रप्रदेशाध्यक्षाणां कवितापाठः

(वत्सदेशराजशर्मा)

२४/१०/२०२४ तः २६/१०/२०२४ पर्यन्तं कर्नाटकराज्ये समायोजितस्य अखिलभारतीयप्राच्यविद्यासम्मेलनस्य द्वितीयदिने (२५/१०/२०२४) वादिराजयुवकविगोष्ठी समायोजिता। एतस्यां गोष्ठ्यां आभारतं पञ्चदश



कवयः स्वकीयकवितापाठाय आमन्त्रिताः आसन्। अत्र अध्यक्षरूपेण परमविदुषां प्रो. श्रीरमाकान्तपाण्डेयमहाभागानाम् उपस्थितिः सभायै भूषणम् आसीत्। प्रमुखातिथिरूपेण श्रीरामकृष्णपेजत्तायवर्यैः तथा च सञ्चालकत्वेन डॉ.परागजोशी महाभागैः गोष्ठीमञ्चम् अलङ्कृतम्। विशेषत आहूतेषु नैकेषु कविषु वैदिकगणस्य महाराष्ट्रप्रदेशाध्यक्षाणामपि कवितापाठः समभूत्।

## येन केन भवेन्नाम्ना देवी तु सर्वमंगला


प्रो. बनमाली बिश्वालः

भारतीयेषु पर्वसु दीपावली विशिष्यते।
कालीपूजा दिने चास्मिन् भारते नु विधीयते।।
पूज्यन्ते कालिकादेव्यः क्षेत्रे श्रीपुरुषोत्तमे।
प्रसिद्धयतितमां पुर्यां देवी दक्षिणकालिका।।
वीरगोविन्दपुर्याख्ये ग्रामे पीठं पुरातनम्।
नरसिंहपुरे ग्रामे नवीनं वै प्रतिष्ठितम्।।
प्रतापपुरनाम्नि च ग्रामे तस्याः सहोदरी।
कामरूपाभिधा ख्याता ज्येष्ठा सा भगिनी मता।।
समजाजपुरे ग्रामे चोग्रतारा प्रसिद्धयति।।
एषा दक्षिणकाल्याश्च भगिनी मध्यमा मता।।
प्रसिद्धा वालिसाहिस्था श्यामाकाली च सर्वथा।
गछकाली च पुर्यां तु प्रसिद्धयति जने जने।।
वालिसाहिसमीपेस्ति चान्या दक्षिणकालिका।
क्षेत्रे च वैष्णवेप्यस्मिन् सन्ति शक्तेरुपासकाः।।
कालीपूजावधौ नैका: पुर्यां काल्यः प्रतिष्ठिताः।
बडशंखे च काली तु प्रतिवर्षं प्रपूज्यते।।
अवसरेषु सर्वेषु पूज्यते बाटमंगला।
येन केन भवेन्नाम्ना देवी तु सर्वमंगला।।

## ‘श्रेष्ठः को ह्यधमः सुधीषु कथनं मन्योऽपराधो महान्’


डा. अम्बरीशकुमारमिश्र
(सहायकप्राचार्य)
भरतमिश्रसंस्कृतमहाविद्यालय

सारल्योशिजनुत्तमं ह्युपमितं बोध्यं महानन्ददम्,
काव्यं तत्पठनीयभावभरितं श्रीकालिदासस्य वै।
अर्थाधानविशेषशेषविगतं काव्यं कवेर्भारवेः,
लालित्यं यदि वाञ्छतीति सुतरान्नूनं कवेर्दण्डिनः॥१

लालित्यं पदगौरवं ह्युपमितं जालं कवे वाञ्छसि ,
माघस्यानघकाव्यकौशलमहो संस्तुत्य नूनं पठ।
जाता बुद्धिगता रुजा जडमयी बुद्धिः कुबुद्धिं गता,
जाड्यं रोगनिवारकं कविरसं श्रीहर्षकाव्यं पिब।२

गद्ये नैकषबोधके तव रुचिः चित्ताहराह्लादके,
बाणस्यानुपमानघां पठ सुधी: कादम्बरीं प्राणदाम्।
वक्रोक्तिं यदि वाञ्छसि प्रपठ भो वक्रोक्तिकाव्यं महत्,
ऐतिह्यात्मककाव्यमाह्वयति चेत्त्वौकल्हणं त्वं पठ।३।।

कारूण्याब्धिरसे निमज्जसि कवे श्रीरामपादाम्बुजे,
हृष्टस्त्वं पुटपाकभावविभवं श्रीभूतिकाव्यं पठ।
कापाट्यनमदादिमायिकगुणज्ञानार्थमायाति भोः,
काव्यं शौद्रकमृत्तिकाशकटिकं प्रज्ञानवंस्त्वं पठ।४

गद्याजिह्मसुमोदमिच्छसि नवं बाणाम्बिकाज्ञं पठ,
नैकेऽज्ञातबुधैः कृते सुकवनेऽनैको रसः प्राप्यते।
वैचित्र्याभिरुचिं निधाय सुधियोऽह्लादे निमज्जन्त्यहो,
श्रेष्ठः को ह्यधमः सुधीषु कथनं मन्येऽपराधो महान्।५

## रामराज्यकामना

-आचार्यो विवेककुमारपाण्डेयः

रामराज्यं प्रशस्यं हि सर्वत्र यच्चर्च्यते भूतसौख्यप्रदं मङ्गलम्।
तद्धि सर्वत्र तद्वत्तथास्मिन् युगे स्यात् सुकामं पिपर्वेव नो वै शुभम् ।।१।।
राम इन्दीवराभो जगन्मोहनः सर्वदेवाश्रयस्सर्वतश्शोभनः ।
शाङ्गर्पाणी रमेशोर्मिलेशाग्रजः सोऽवधेशश्च जातो जगत्यामजः।।२।।
रामराज्ये सतीदं जगत्सर्वतः प्रेमपूर्णं मिथः वस्तु पश्येत्तत् ।
मोदमाना इह प्राणिनः सन्त्वलं कामये सम्भवेत्सर्वतो मङ्गलम् ।।३।।
काल अर्कोषधीशस्य चास्तोदयं वत्सरे चानुकूलं भवेद्वर्षणम् ।
सस्यसमृद्धिमद्देशसङ्घस्तथा विश्वशान्तिर्भविष्यत्यतो नाऽन्यथा ।।४।।
संवहेत्त्रिप्रकारेण वायुश्शुभः भैर्युतं शोभमानञ्च सर्वं नभः ।
स्यादथो भीतिजालं समस्तं यथा ह्याशु नश्येन्न भूयात्क्वचित् सर्वथा ।।५।।
केनचिन्नैव दुष्कर्म आचर्यतां साधुसत्सेवया पुण्यमाधीयताम्।
गीतिका लोककल्याणदा गीयतां हे प्रभो! नः वरोऽयं त्वया दीयताम् ।।६।।
ये खला पर्यन्तो मुहुः सज्जनान्पीडयन्तो भवन्तीह वै मानवान्।
यान्तु ते संक्षयं शीघ्रमायातु भो रामराज्यं कलौ कामये चेत्यहो ।।७।।
दीनहीनेषु सर्वो दयाभावनायुग्भवेदस्ति मे चेति सङ्कल्पना।
जीवमानोऽन्यजीवं प्रति प्रेमतः सम्भवेन्नाथ! सर्वः स्वकृत्ये रतः ।।८।।
हेऽवधेश ! त्वया व्याप्य विश्वं स्थितं वेदवाक्ये वचो मे प्रमाणं मतम् ।
तर्हि राज्यं कथन्नास्ति तत्सन्ततं त्वं कुरुष्वेति भक्तस्य सम्प्रार्थनम् ।।९।।
इत्थमाश्रुत्य हे राम ! भक्तस्य ते कामना पूर्यताम्भूमिजायाः पते ।
नश्यतामीश नो हृद्गतं वै तमः सर्वथेदं विवेकस्य तुभ्यं नमः ।।१०।।

## हे दिवाकर! दीनबन्धो!


डा.शशिकान्त तिवारी शशिधर
सहायक प्रोफेसर
राजकीय संस्कृत कालेज पटना

सर्वे बिहारिमनुजाश्छठपर्वकाले
यान्तीह नैजभवनं मुदितात्मना ते।
हे सूर्यदेव!रजनीहर! हे दयालो!
पूर्णं मनोरथमहो! व्रतिनः कुरुष्व।।०१।।
प्रत्यक्षतो जनमनस्तव दिव्यरूपं
सम्पश्यति प्रियकरं ह्यनुकम्पया ते।
विश्वं प्रकाशयुतमस्ति तव प्रभावात्
पूर्णं मनोरथमहो! शशिनः कुरुष्व।।०२।।
संसारसागरसमज्जितमन्दबुद्धि
र्जातोस्मि लोकसुखदत्तसमस्तकालः।
नो चिन्तयामि तव कीर्तिमहो! विशिष्टां
पूर्णं मनोरथमहो! व्रतिनः कुरुष्व।।०३।।
किं कार्यमस्ति कठिनं कृपया भवेन्नो
लोके समस्तसुखशान्तिसमृद्धिमूलः।
त्वं वर्त्तसे मम विभो!नहि कापि शङ्का
पूर्णं मनोरथमहो! शशिनः कुरुष्व।।०४।।
त्यक्त्वा त्वदीयशरणं वद यामि कुत्र
हे देवदेव सुदिवाकर दीनबन्धो!।
चन्द्रस्त्वदीयकृपयैव निशाकरोस्ति
पूर्णं मनोरथमहो! व्रतिनः कुरुष्व।।०५।।
सर्वं खलु प्रकृतिगतञ्चराचरञ्च
त्वत्तस्सुजीवितमिदञ्च जगत्समस्तम्।
नो स्यात्कृपा तव यदा भवतान्मृतन्तत्
पूर्णं मनोरथमहो! शशिनः कुरुष्व।।०६।।
येनापि दिव्यशरणं मनसा गतन्ते
सर्वोभिलाषनिकरश्च गतस्सुपूर्णः।
इत्थं मया श्रुतमिदं गुरुदेववाक्यैः
पूर्णं मनोरथमहो! व्रतिनः कुरुष्व।।०७।।
आदित्यदेव सवितस्तव सद्वरेण्यै-
रालोकितञ्जगदिदं सुविचित्रमेतत्।
आलोकयेशशिधरस्य मतिं प्रभो!त्वं
पूर्णं मनोरथमहो! शशिनः कुरुष्व।।०८।।

## त्वत्कृते


महेशशास्त्री
कुरेडा, टोङ्क,राजस्थानम्
मो. ९८२८८७४६०१

गीतगुच्छो मया लिख्यते त्वत्कृते।
प्रेमरागेण तद्गीयते त्वत्कृते।।

आगमो ग्रामके ते गृहे चक्रकम्।
प्रत्यहं यन्मया यत्यते त्वत्कृते।।

शान्त एकान्तके त्वां भृशं चिन्तयन्।
दर्शनार्थमया स्थीयते त्वत्कृते।।

नूतनं वासितं वाससो युग्मकम्।
यद्धि धृत्वा सदा भ्रम्यते त्वत्कृते।।

आपगायास्तटे बालुकायां वरम्।
हस्तकञ्जेन यल्लिख्यते त्वत्कृते ।।

अर्चनाकालके मन्दिरे पावने।
ध्यानलीनेन सम्प्रार्थ्यते त्वत्कृते।।

दीपमालोत्सवे दीपकानां ततिः।
सद्मनश्चत्वरे ज्वाल्यते त्वत्कृते।।

निर्जने कानने वेणुकायाः रवः।
भावमग्नेन वै तन्यते त्वत्कृते।।

नो महेशो मनाग् यातुमीहे कदा।
दूरदूरं यतो जीव्यते त्वत्कृते।।

## पाठकानां कृते सूचना

**कृपया ‘संस्कृत-संवादः’ पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन ‘संस्कृत-संवाद’ इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

## अमरवाणीकविपरिषत्परिकल्पकः


-डॉ. अरविन्दकुमारतिवारी

(०१)

## सदा जयं वदेम!

विहाय सर्वकामनाः स्वराष्ट्रसेविनो वयं
चलेम भारतध्वजं करे निधाय सन्ततम्।
समस्तशत्रुनाशने कवित्वशास्त्रपाणयः
सदा जयं वदेम भारतीसुता जितारयः।।१
विचित्रदिव्यभारतीयसंस्कृतिप्रचारकाः
स्वदेशरक्षणव्रतोत्सवाधिनायकात्मजाः
स्वराघवेन्द्रसायकाः स्ववमाधवेन्द्रगायकाः
सदा जयं वदेम भारतीसुताः सहायकाः।। २
अभेदभेदनीतयो विनष्टजातिगीतयः
शिवाशिवादिभूतयो विदग्धसिद्धदीप्तयः।
अनन्तसूर्यकान्तयो विभावितात्मकीर्तयः
सदा जयं वदेम भारतीसुता हृदब्धयः।। ३
अवन्तिकादितीर्थमृत्तिकामया निरामयाः
सदाशया विलेशयादिधर्षणे धृतासयः।
कुचीनपाकदुष्टनाशकारिवह्निमूर्तयः
सदा जयं वदेम भारतीसुता मृतार्तयः।। ४
स्वधेनुचारका वयं सुसिन्धुतारका वयं
हिमप्रसूतगाङ्गवारिपूजकाः नरा ध्रुवम्।
नवारविन्दपुष्पपरागकर्षका दुर्गर्चयः
सदा जयं वदेम भारतीसुता महर्षयः।। ५

(०२)

## नमामि मेरठं प्रियम!!

स्वराष्ट्रमानवर्द्धकं स्वदेशमानसर्जकं
विशालयुद्धरक्षितं महर्षिसिद्धसेवितम्।
सुधर्ममर्मपोषकं कुशासनादिशोषकं
स्वतन्त्रताकथाकरं मुदा नमामि मेरठम्।। १
सुगीतयाभिषिञ्चितं युधिष्ठिरादिपालितम्।
धनञ्जयाभिमन्युभीमशौर्यकीर्तिदर्शकम्।
श्रुतिप्रकाशभाषितं निजार्यकृत्यकीर्तितं
प्रवीरसैन्यदायकं मुदा नमामि मेरठम् ।। २
अहो नु शुक्रतीर्थपुण्यसंचयातिपावनं
युगान्तकारियुद्धघातघातनोत्थितं नवम्।
कृषीबलप्रयासकार्यशस्यधान्यभूषितं
स्वकृष्णपादधूलिधारकं नमामि मेरठम्।। ३
शकुन्तलाकथाकलं महर्षिबादरायणो-
ज्ज्वलं विशालभारतस्य सीमरक्षणे रतम्।
सुयोधनस्य लाक्षयाोपशोभितं सदोन्नतं
हिमालये विराजितं प्रियं नमामि मेरठम्।। ४
समृद्धचौधरीस्थलं कृषीबलस्य जीवनं
हरीतिमप्रियं सरिद्वयीजलेन पालितम्।
सदैव मल्लराजितं तथात्रिमन्त्रपावितं
पुरातनं स्वहस्तिनापुरं नमामि मेरठम्।। ५

## संस्कृतवाक्पञ्चकम्

-हरिदत्तशर्मा

सदा सतां हितावहं सुबुद्धिदायकं द्विषां,
यशोविवर्धकं भुवां विधेर्मुखात् समागतम्।
हिताय कल्पते च यत् करोति सर्वथा हितं,
बुधैर्नुतं सुरैर्नुतं नमामि संस्कृतं प्रियम् ।।१।।

गिरां हि मातरं भुवि त्विदं ब्रुवन्ति कोविदाः,
समग्रसौख्यकारणं समस्तपापखण्डनम्।
समस्तलोकरञ्जकं समग्रविश्वपोषकं,
प्रसादभावभास्वरं नमामि संस्कृतं प्रियम्।।२।।

सुकाव्यनाट्यसंयुतं प्रबन्धकल्पनायुतं,
श्रुतिस्मृतिप्रकाशितं सुगीतगानवर्णितम्।
कवीन्द्रवृन्दवन्दितं रसैर्नवै रसान्वितं,
मनोहरं मधुस्वरं नमामि संस्कृतं प्रियम्।।३।।

गुणैर्हितैः सुभाषितैर्जगच्छिवं तनोति यत्,
प्रियप्रबन्धनैः सदा नृणां प्रियं करोति यत्।
सुरैर्बुधैः सुवन्दितं पवित्रवेदमण्डितं ,
प्रमुग्धकाव्यकल्पनं नमामि संस्कृतं प्रियम्।।४।।

प्रशस्तमार्गदर्शकं दुहोति यच्च सज्जनान्,
मनोमलं दुनोति यत् पुनाति सर्वमानवान्।
यशोविमानवर्द्धनं परोपकारभावनं,
सुकाव्यनाट्यसंयुतं नमामि संस्कृतं प्रियम्।।५।।

# त्रिदिवसीयम् अन्ताराष्ट्रियसम्मेलनम् 'आयुर्धनं 2024' सम्पन्नम्

## भारतम् उत्सवानां, पर्वणां च देशः आचार्यः बालकृष्णः

हरिद्वारम्, २९ अक्टूबर। पतंजलि रिसर्च फाउंडेशन, पतंजलि विश्वविद्यालय इत्यनयोः सहयोगेन अथ च भारत सर्वकारस्य आयुष मंत्रलय द्वारा आयुर्स्वास्थ्य योजनान्तर्गतेन 'आयुर्धनेन २०२४ स्वस्थभविष्यं, आयुर्वेदः प्रौद्योगिकी नवाचाराः इत्येषां सामंजस्यं प्रति अंता राष्ट्रिय सम्मेलन' विषये आयोजिते त्रि दिवसीय सम्मेलनं



सम्पन्नम् । तत्र समापने पतञ्जलि विश्वविद्यालयस्य सभागारे समायोजिते कार्यक्रमस्य शुभारंभे दीप प्रज्वलनेन धन्वंतरि वन्दनया अभवत्।

सम्मेलने स्वामी रामदेवः उक्तवान् यद् आयुर्वेदे अस्थमा, गन्थिः, मधुमेह, कर्कट इत्येषाम् पुरातन असाध्य रोगाणाम् उपचारस्य अद्भुत क्षमता विद्यते। यस्य आधुनिक चिकित्सा प्रणाल्याम् उपचारः संभवः नास्ति।

कार्यक्रमे आचार्य बालकृष्णः कथितवान् यद् अस्मद् ऋषयो विभिन्न पर्वणां संयोजनं प्रदाय स्वस्थ भविष्याय आयुर्वेदः प्रौद्योगिकीं प्रति अग्रसारितः अस्ति। भारतीय चिकित्सा ग्रंथेषु भगवान धन्वंतरिः आयुर्वेदस्य देवता मान्यते । समुद्र मथनाद् अमृत कलशेन सह औषधि पुस्तकं नीत्वा प्रादुर्भूतः। यत्र सर्वविधरोग-व्याधिनाम् उपचारः वर्णितः।

सम्मेलने मुख्यातिथिः उत्तराखंड आयुर्वेद विश्वविद्यालय, देहरादूनस्य कुलपतिः प्रो. (डॉ.) अरुणः आयुर्वेदे गुणवत्तापूर्ण शोधस्य एवं विशिष्ट कार्याणाम् उन्नयने आधुनिक तकनीक्याः अनुभविशोधकर्तघ्णां च आवश्यकतां प्रति बलं ददत् नवाचाराणां निर्माणस्य कथनं प्रतिपादितम् । अथ आयुर्वेद, गुरुग्रामस्य वरिष्ठ परामर्शकः, डॉ. परमेश्वर अरोड़ा मधुमेह नियंत्रणेन मुक्त्या च संबद्धायाः आयुर्वेदिक विवेचनायाः व्याख्या प्रस्तुवन् कथितवान् प्राचीन ज्ञानं आधुनिक ज्ञानेन योक्तुं सम्पूर्ण कल्याणः संभवः।

आयुष मंत्रालय, उड़ीसा सर्वकारे अध्यक्ष प्रो. (डॉ.) गोपाल सी. नंदा 'वैश्विक स्वास्थ्य प्रणाल्यां आयुर्वेदस्य योगदानस्य सतत विकासस्य च लक्ष्य' विषयः उल्लिखन् कथितवान् यद्वयम् आयुर्वेद, योग, प्राकृतिक चिकित्सा, यूनानी, सिद्ध , होम्योपैथी इत्येषाम् अंता राष्ट्रिय विकासाय अवसराः अन्वेषणीयाः। टीडीयू बेंगलुरु कुलपति पद्मश्री प्रो. (डॉ.) दर्शन शंकरः ऑनलाइन प्रस्तुति माध्यमेन भारतस्य नोबल पुरस्कार प्राप्तेः दिशि आयुर्वेद - आधुनिक चिकित्सायाः अंतर्दृष्टौ एकीकृत शोध-समाधाने च महत्त्वपूर्ण वक्तव्यं प्रस्तुतवान् ।

अंता राष्ट्रिय यूरोपियन संगठन - डिजास्टर मेडिसिन ग्रुप इत्यस्य अध्यक्ष प्रो. रॉबर्टो मुगावेरो, (डॉ) गोपाल सी. नंदा, प्रो. सत्येन्द्र राजपूत, प्रो. पार्थ रॉय, नेपालात् समायातः विशिष्टातिथिः बाबू काजी जीवने आयुर्वेदस्य विविधायामान् चर्चितवन्तः । पतंजलि रिसर्च फाउंडेशन, हरिद्वारस्य उपाध्यक्षः डॉ. अनुराग वार्ष्णेयः अंता राष्ट्रिय स्तरे आयुर्वेदस्य विस्तारस्य विकासस्य च महत्त्वपूर्ण विषये विचारान् प्रस्तुतवान्।

साउथ टेक्सास सेंटर ऑफ एक्सीलेंस इन कैंसर रिसर्च संस्थापकः निदेशकः, प्रो. सुभाष सी. चौहान, एस. व्यास सम विश्वविद्यालय, बेंगलुरु डिप्टी रजिस्ट्रार डॉ. वासुदेव वैद्यः, शूलिनी विश्वविद्यालय-सोलन, हिमाचल प्रदेशतः प्रो. पूनम नेगी, केंद्रीय विश्वविद्यालय एचएनबी गढ़वालस्य औषधि विज्ञानस्य प्रो. अजय नामदेवः इत्यादयः आयुर्वेदान्नवीन नवाचाराणां यात्राणाम् अपार संभावनाः, प्राचीनायाम् आधुनिक चिकित्सायां संयोजनं चिकित्सीय लाभांश्च प्रकाशितवान् ।

भारतीय प्रौद्योगिकी संस्थान, दिल्लीतः डॉ. भूपेंद्र सिंहः, ट्रांस डिसिप्लिनरी स्वास्थ्य विज्ञान प्रौद्योगिकी विश्वविद्यालय, बेंगलुरुतः अनुशासनिक प्रो. (डॉ.) अश्विनी गोडबोले, अमेटी इंस्टीटड्ढूट ऑफ नैनोटेक्नोलॉजी, हरियाणा गुड़गाँवतः प्रो. अतुल ठाकुरः, डोईवाला, देहरादून स्पर्श हिमालय विश्वविद्यालयतः प्रो. (डॉ.) प्रदीप कुमार भारद्वाजः, ऋषिकुल परिसर, हरिद्वारतः प्रो. रूबी रानी अग्रवालः, पतंजलि रिसर्च अनुसंधानस्य वैज्ञानिकः डॉ. अनुपम श्रीवास्तवः च आयुर्वेदस्य विविधान् अंशानां ज्ञानं चर्चितवन्तः । राष्ट्रिय-अंता राष्ट्रिय स्तरे विभिन्न शोधार्थिनः , विद्वांसश्च शोध पत्र प्रस्तुतवन्तः।

आगन्तुक अतिथिभ्यः आभारं ज्ञापयन् पतंजलि हर्बल रिसर्च डिविजन विभागस्य अध्यक्षः डॉ. वेदप्रिया आर्या आयुर्वेदस्य वैश्विक मान्यतायै स्वीकृतये च साक्ष्याधारितं शोधं प्रति बलं दत्तम्।

आयुर्वेद कॉलेज, हरिद्वारस्य प्राचार्यः डॉ. अनिल कुमारः कथितवान् यत् एतादृशसंगोष्ठ्यः नवीन दृष्टिकोणं प्रददति। तेन देशाद्-विदेशाच्च समागतेभ्यः समस्त विद्वद्भ्यः , वैद्येभ्यः, वैज्ञानिकेभ्यः, चिकित्सकेभ्यः आयुर्वेदस्य सुधीजनेभ्यश्च धन्यवादो ज्ञापितः




## भारतसर्वकारेण निर्णीता आयुर्वेदगुरुकुलस्य स्थापना एकं ऐतिहासिकं वृत्तम्-कुलपतिः प्रो. श्रीनिवासवरखेडी



दिल्ली,प्रो अजय कुमार मिश्रा, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवास वरखेडी कथितवान् यत् सर्वकार द्वारा संस्कृत तथा आयुर्वेद विद्या इत्यनयोः समावेशि-उन्नयनाय श्आयुर्वेद गुरुकुल-स्थापना एकस्तावद् ऐतिहासिको निर्णयः ।

यस्य अन्तर्गतं सार्धसप्तवर्षाणां श वैचलर औफ आयुर्वेदिक मेडीसन एंड सर्जरी कार्यक्रमःश संचालयिष्यते। यत्र भौतिक विज्ञानं ,रसायन विज्ञानं अन्यैर्विषयैः सार्ध संस्कृतस्य अध्ययनं भविष्यति येन आयुर्वेदस्य मूल स्रोतांसि अपि संस्कृत माध्यमेनैव अध्यापयिष्यन्तेघ। अनेन नूनमेव भारतीय ज्ञान परम्पराणां संबर्धनेन सममेव संस्कृत - क्षेत्रे जीवनवृत्तेः नवाचारिणोऽवसराः समुद्घटिष्यन्ते।

ध्यातव्यं यत् सर्व श्आयुर्वेद गुरुकुलम् श्केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली इत्यस्य मार्गदर्शने संचालयिष्यते । नियमानुसारं समग्रदेशे परिसराणाम् उघाटनं भविष्यति । सार्धम् अद्यतन मूलभूत सुविधानां संसाधनानां संरचनानां चापि व्यवस्था भविष्यति।

, अकादम्याः कुलपतिः प्रो मदन मोहन झा प्रौक्तवान् यत् सर्वकार नियमानुसारम् अत्र प्रतियोगिता परीक्षा आधारेण नामांकनं भविष्यति । कुल सचिवः प्रो आर.जी. मुरली कृष्णः उक्तवान् यत् विश्वविद्यालयस्य कृते एतत् महत्त्वपूर्ण उत्तरदायित्वं भारत सर्वकारेण दत्तम् । प्रो मधुकेश्वर भट्टः, निदेशक योजना ( केन्द्रीय) मनुते यत् तेन योजना विभागाय अधिक दूरगामि योजनानां क्रियान्वयनाय अवसरो लप्स्यते । परीक्षा नियंत्रक, प्रो पवन कुमारः तथा अन्यैः अधिकारिभिः सह हर्ष प्रकटयन्नुक्तवान् यत् संस्कृतस्य विकासः सम्भविष्यति। अस्मै घोषणायै कुलपतिना सर्वकाराय संस्कृत परिवारपरतया आभारो व्यक्तीकृतः। विविध राज्येभ्यः संस्कृत विद्वद्भिः, विदुषीभिः अनुरागिभिः कुलपतये प्रो श्रीनिवास वरखेडीवर्याय एतदर्थमपि वर्धापनानि दीयन्ते यत्तेन अस्य कार्यक्रमय क्रियान्वयनाय भारत सर्वकारस्य समक्षं विशेषेण परामर्शः प्रस्तुतः आसीत।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।